## स्वमोर्नपुंसकात्। (२३/३१९)

सु अम् इत्येतयोः नपुंसकादु[1]त्तरयोः लुग् भवति। [2]दधि तिष्ठति। दधि पश्य। मधु तिष्ठति। मधु पश्य। त्रपु। जतु। तद्ब्राह्मणकुलम् इत्यत्र [3]लुका त्यदाद्यत्वं बाध्यते, पूर्वविप्रतिषेधेन नित्यत्वाद् वा। लुको हि निमित्तम् 'अतोऽम्' (७.१.२४/३०९) इति [4]लक्षणान्तरेण विहन्यते, न पुनस्त्यदाद्यत्वेनैव। यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं भवति॥

## अतोऽम्। (२४/३०९)

[5]अकारान्तान्नपुंसका[6]दुत्तरयोः स्वमोः अम् इत्ययमादेशो भवति। [7]कुण्डं तिष्ठति। कुण्डं पश्य। पीठम्। मकारः कस्मान्न क्रियते? दीर्घत्वं प्राप्नोति (७.३.१०२/२०२)॥

## अद्ड्डतरादिभ्यः पञ्चभ्यः। (२५/३१५)

[8]डतरादिभ्यः परयोः स्वमोः अद्ड् इत्ययमादेशो भवति। कतरत् तिष्ठति। कतरत् पश्य। कतमत् तिष्ठति। कतमत् पश्य। इतरत्। अन्यतरत्। अन्यत्। पञ्चभ्यः इति किम्? नेमं तिष्ठति। नेमं पश्य। डित्करणं किम्? कतरत् तिष्ठति इत्यत्र पूर्वसवर्णदीर्घो मा भूत्। इह तु कतरत् पश्य [9]इति स्थानिवद्भावाद् अमि पूर्वत्वेनापि सिध्यति। एवं तर्हि तकारादेश एव कस्मान्न [10]विधीयते? हे कतरत् इति सम्बुद्धेर्लोपो मा भूत्।

अपृक्तश्चेदमो दोषो निवृत्ते डतरादिषु।
अड्डित्त्वाड्डतरादीनां न लोपो नापि दीर्घता॥

## नेतराच्छन्दसि। (२६/३५८९)

इतरशब्दादुत्तरयोः स्वमोः छन्दसि विषये अद्डादेशो [11]न भवति। 'मृतमितरमाण्डमवापद्यत' (मै.१.६.१२)। [12]वार्त्रघ्नमितरम्। छन्दसि इति किम्? इतरत् काष्ठम्। इतरत् कुड्यम्। 'अतोऽम्' (७.१.२४/३०९) इत्यस्मादनन्तरमितराच्छन्दसि इति वक्तव्यम्? नेतराच्छन्दसि इति वचनं योगविभागार्थम्

[८१७] एकतराद्धि सर्वत्र छन्दसि भाषायां प्रतिषेध इष्यते। (म.भा.३.२५०)

एकतरं तिष्ठति, एकतरं पश्य इति॥

---

1. अङ्गात् इत्यधिकम् इ. ह. 2. दधि तिष्ठति नास्ति क. 3. लुक् क. 4. लक्षणान्तरेण नास्ति क. 5. नपुंसकात् इत्येव इत्यधिकम् क. 6. अङ्गात् इत्यधिकम् क. ई. 7. वनं तिष्ठति वनं पश्य क. इ. ई. 8. पञ्चभ्यः नपुंसकेभ्यः इत्यधिकम् ब. ड. इ. ई. ह. 9. इत्येव क. 10. क्रियते क. 11. न नास्ति क. 12. वार्त्रघ्नम् इतरत् इ.

THE SANSKRIT LIBRARY FAIRFIELD, IA 52556